National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(63): 45-47
© 2025 NJHSR
www.sanskritarticle.com

**सागरिकासरकारः**
शोधच्छात्रा, अनुसन्धानप्रकाशनविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**सागरिकासरकारः**
शोधच्छात्रा, अनुसन्धानप्रकाशनविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# काश्यपसंहितानुसारं बालविकासः

**सागरिकासरकारः**

निश्चप्रचमेवेदं विपश्चितां सुखमेव परमः पुरुषार्थ इति। तच्च सुखं दुःखं निवृत्यात्मकप्रक्रियाद्वारा एव सम्भवति। दुःखे सति हि तन्निवृत्तिर्वा सुखं वा नेदेतुं प्रभवति। जगति सर्वेषामपि सर्वाधिकमप्रियं दुःखम् आध्यात्मिक-आधिभौतिक-आधिदैविकरूपं त्रिविधं भवति। त्रिविधेषु दुःखेषु आध्यात्मिकदुःखस्य उपशमनाय उपासनाशास्त्राणि, नीतिभैषज्याद्यैहिकशास्त्राणि चार्थवन्ति भवन्ति। उक्तं च चरक-संहितायाम्- **धर्मार्थकाममोक्षणमारोह्यं मुलसाधनम्।** अतः हेयाः दुःखात्मानो रोगाः, तेषां हेतवः (निदानादिनि) हेयरोगाणां हानं (निवृत्तिः) हानेः साधनानि (भैषजादीनि) चेति अत्यन्तमुपकारीणि भवन्ति आरोग्यस्य सम्प्राप्तये। सर्वदा हेयानां रूपाणि परिचित्य ज्ञातैसदीये हेतुभिः पूर्वमेव परिह्रिय-माणैस्तदनुपपत्तये विज्ञातैश्च हानसाधनैः कथञ्चनोत्पन्नानामपि तेषां निवृत्तये भवितव्यम्।

श्रेयसाधनतया हितावहेषु विविधेषु ज्ञानविज्ञानप्रभेदेषु सर्वोपजीव्य यद्विज्ञानरत्नं तदेवार्युवेदविज्ञान-मित्युच्यते। एतद् विज्ञानं न केवलं स्वस्य एकस्य जनस्योपकृतये उपयुज्यते, अपि चु कुटुम्बस्य समाजस्य देशस्य उपकृतये उपयुक्तं भवति।

आयुर्वेदशबादार्थप्रदशनेऽस्यो काश्यपसंहितायां- आयुजीवितमुच्यते, विद् ज्ञाने धातुः, विदलृ लाभे च, आयुरनेन ज्ञानेन विद्यते ज्ञायते विन्दते न रिप्यतीत्यायुर्वेदः[1] इति दीर्घजिवितस्य ज्ञापकमुपाय-प्रतिपादनद्वारा प्रपकमविनाशकं च शास्त्रमायुर्वेद इति। विधीयमाननिर्वचनमस्य स्वरूपं प्रयोजनं च निदर्शयति।

प्राचीनायुर्वेदग्रन्थेषु सुश्रुतसंहिता चरकसंहिता नवोपलब्धये काश्यपसंहितेति यदिव महनीयग्रन्थविशेषः श्रेष्ठः इति। सुश्रुतसंहितायां धन्वन्तरि, चरकसंहितायां पुनर्वसुरात्रेय इवास्यां काश्यपसंहितायां काश्यपो मुलभूतः उपदेशको इति अवगम्यते।

काश्यपसंहितायाः विषयो भवति कौमारभृत्यम्। अर्थात् बालविकासचर्चा इति। अस्य प्रयोजनं सुश्रुतेन प्रतिपादितम्- कौमारभृत्यं नाम कुमारभरणधात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्यग्रहसमुस्थानां च व्याधीनामुपशमनार्थम्[2] इति। अर्थात् बालकानां पालनपोषणं, मातुः क्षीरदोषस्य संशोधनम्, तथा ग्रहैः उत्पन्नरोगाणां शान्त्यर्थं कौमारभृत्यस्य प्रयोजनं विद्यते।

सुश्रुतसंहिता शल्यप्रधानम्, तथापि सुत्रस्थानस्य उत्तरतन्त्रे 27 अध्यायतः 38 अध्यायपर्यन्तं कौमारभृत्यमालोचितम्। तत्र विशेषतः ग्रह-स्कन्द-पूतनादिनां प्रतिषेधः तथा तेषाम् उपशमनाय काश्चन ओषधयः सूचिताः सन्ति। चरकाचार्यस्य चरकसंहितायाः कायचिकित्सासम्बन्धितः इत्यतः आयुर्वेदस्य अष्टौ अङ्गानि सुविस्तृतया प्रतिपादितानि। किन्तु कौमारभृत्यम् अर्थात् शिशूनां बालानां वा विषये आरोग्यविषयाः चर्चा तथा न आलोचिताः। किन्तु कुत्रचित् प्रसङ्गस्य आनुषाङ्गिकतया प्रस्तुतानि सन्ति।

काश्यपसंहितायां बालकस्य उत्पत्तिः रोगः, निदानम्, चिकित्सा, ग्रहादीनां प्रतिषेधविषयाः आलोचिताः सन्ति। अस्यां संहितायां विशेषतः कौमारभृत्यस्य प्रमुखाः विषयाः विशदीकृताः वर्तन्ते। तथा चोक्तम्- कौमारभृत्यमष्टानां तन्त्राणामाद्यमुच्यते[3] एवञ्च कौमारभृत्यमतिवर्धनमेतदुक्तम्[4] इति।

कैमारभृत्यं नाम कुमारभरणधात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्यग्रहसमुत्थानां च व्याधिनामुपशम-नार्थम्[5] इति।

संहितायाः अस्याः मूलमातृकायाः सम्पूर्णभागः नोपलब्धः। प्रारम्भे कश्चन भागः नोपलब्धः। अस्याः आरम्भः तु बालकानां लेहनमिति विषयमाधारीकृत्य प्रवृत्तम्। लेहनमिति बालकानां चर्चार्थं प्रमुखः अंशो भवति। अस्याः रचनायां प्रश्नोत्तरप्रक्रिया समाश्रिता वर्तते। अर्थात् प्रत्येकमपि अध्यायस्य आरम्भे कश्चन शिष्यविशेषः आचार्यं काश्यपं स्वीयां शङ्कां पृच्छति, तदनुसारमाचार्यः काश्यपः समादधाति इति। प्रथमा शङ्का एवम्-

**किं वा लेहयितव्यं च किं वा लेहितलक्षणम्।**
**अतिलोहितदोषाः के के च दोषा अलेहिते॥**
**मन्दलीढस्य किं रूपं गुणदोशाश्च तत्र के।**
**के लेहनोद्भवा रोगाः कश्च केषामुपक्रमः॥**
**एतन्मे भगवन् सर्वं वक्तुमर्हसि तत्त्वतः।**
**सुखं दुःखं हि बालानां दृश्यते लेहनाश्रयम्॥**[6]

अर्थात् भगवन् बालकैः केषां वस्तूनां लेहनं करणीयम्। उत्तमलेहनस्य किं लक्षणम् ? अतिलेहनस्य अलेहितस्य च कः दोषः? मन्दलीढस्य किं स्वरूपम्? तथा च तस्य गुणदोषौ कौ? लेहनात् उत्पन्नाः रोगाः के?, तेषां चिकित्सा च का ? इत्यादीनां प्रश्नानां समाधानं यथायथम् उपदिशतु, यतो हि बालानां सुखं दुःखं च लेहनाश्रितं भवति।

लेहनाध्यायस्यास्य मुख्यविषयो लेहनमिति। बालकानां स्वास्थ्यं, बलं वृद्धिश्च प्राचीनकालादारभ्य अनेकप्रकारकलेहनकार्यस्य उपरि आधारितमस्ति। लेहनकर्मणि स्वर्णस्य महत् स्थानं वर्तते। सद्यजातबालकं मधुना सह स्वर्णस्य लेहनं कार्यते। स्वर्णं मेधावर्धकं भवति। लेहनं तु सर्वैरपि करणीयमिति नास्ति। काश्यपेन सूचिताः सन्तिः लेहनं कैः अवश्यं कर्तव्यमिति। तथा चोक्तम्-

**अक्षीरा जननी येषामल्पक्षीराऽपि वा भवेत्।**
**दुष्टक्षीरा प्रसूता या धात्री या यस्य तादृशी।।**
**दुष्टप्रजाताभृशव्याधिपीडितायाश्च ये सुताः।**
**वातिकाः पैत्तिका ये च ये च स्युः कफवर्जिताः ।।**
**स्तन्येन ये न तृप्यन्ति पीत्वा पीत्वा रुदन्ति।**
**अनिद्रा निशि ये च स्युर्गे च बाला महाशनाः।।**
**अल्पमूत्रपुरीषाद्ध बाला दीप्ताग्नयश्च ये।**
**निरामयाश्च तनवो मृडङ्गा ये च कर्शिताः।।**
**वर्चः कर्म न कुर्वन्ति बाला ये त्र्यहात् परम्।**
**एवंविधाञ्छियशूनाह लेहयेदिति कश्यपः।।**[7]

लेहनं तु उपरि सुचितेभ्यः बालकेभ्यः लेहनकार्यं कार्यते। किन्तु सर्वेभ्यः बालकेभ्यः लेहनं हिताय न भवति। अतः महर्षिणा ते वालकाः अपि सुचिताः येभ्यः लेहनं न कार्यते। ते यथा-

**........................च मन्दाग्निजठरो जनः।**
**निद्रालुर्बहुविण्मूत्रः स्वल्पो यो दृढगात्रकः।।**
**कल्याणमातृकोऽजीर्णी गुरुस्तन्योपसेविता (तः)।**
**सुतः सर्वरसाशिन्या ऊर्ध्वजत्रुरुजान्वितः ।।**
**आमे ज्वरेऽतिसारे च कामलाशोथपाण्डुषु।**
**हृद्रोगश्वासकासेषु गुदबस्त्युदरामये।।**
**आनाहे गण्डवैसर्पे छीरोचकयो (र्बले)।**
**हे सर्वग्रहेषु च। न लेहयेदलसके नाहन्यहनि नाशितम्।**
**न दुर्दिनपुरोवाते नासात्म्यं नातिमात्रया।।**[8]

(का०सू० लेहाध्याय पृ० ४)

अर्थात् जठरस्य अग्निप्रभावः यस्य मन्दः, यः अतिनिद्रां करोति, यः अधिकमलमूत्रं त्यगं करोति, कल्याणमातृकः शरीरं स्वल्पं कठोरञ्च भवति, अधिकं दुग्धस्य पावकः, अजीर्णरोगग्रस्थः, सर्वरसानां पावकः, उर्ध्वजत्रुरोगग्रस्थः, आम्रज्वरग्रस्थः, पाण्डुरोगग्रस्थः, हृदरोगग्रस्थः, श्वासरोगग्रस्थः, उदररोगग्रस्थः, अरुचिरोगग्रस्थः इत्यादि बालेभ्यः लेहनं निषिद्धं वर्तते।

कल्याणमातृकः इति शब्दस्य अर्थः यस्य माता स्वर्गवासं प्राप्तवती, अथवा यस्य जन्मदात्री माता न विद्यते विमाता वर्तते सः बालः कल्याणमातृकः। मेदिनीकोषे वर्तते- **कल्याणमक्षयस्वर्गे** इति।

काश्यपमहर्षेः मतानुसारं बालकस्य आहारसंस्कारः तस्य मातुः गर्भकालावस्थायामेव भवति। माता गर्भकाले यादृशनाम् आहाराणां सेवनं करोति, तादृशेन आहारेण सह बालकस्य स्वास्थ्यस्य पुष्टिविज्ञानं निर्धारितं भवति। अतः मातुः आहारस्य ग्रहणकाले देश-काल-अग्निमात्रादि विषयान् मनसि ध्यात्वा तेषां सेवनं करणीयम्। अन्यथा सात्म्ये भावेऽपि बालकानां विपरीतकार्याथी भवति। तथा चोक्तम्-

**सेवितान्यन्नपानानि गर्भिण्या यान्यभ..........।**
**तानि सात्म्यानि बालस्य तस्मात्तान्युपचारयेत्।।**
**देशकालाग्निमात्राणां न च कुर्याद्व्यतिक्रमम्।**[9]

**लेहनविधिः**

लेहनमेका वैद्यिकी प्रक्रिया भवति। तां सम्पादयितुं काश्चन् विधयः केचन् नियमाः वा अस्माभिः पालनीयाः सन्ति। विध्यनुसारं लेहनप्रक्रिया सम्पाद्यते चेदेव बालानां लेहनकर्मणः फलप्राप्तिः भवति। उक्तं च-

**द्रव्याणां लेहनीयानां विधिश्चैवोपदेक्ष्यते।**
**विधृष्य धौते दृषदि प्राङ्मुखी लघुनाऽम्बुना॥**
**आमथ्य मधुसर्पिभ्यां लोहयेत् कनक शिशुम्।**
**सुवर्णपाशनं ह्योतन्मेधाग्निबलवर्धनम्।**
**आयुष्य मङ्गलं पुण्यं वृष्यं वर्ण्यं ग्रहापहम्॥**
**मासात् परमेधावी व्याधिर्भिर्न च धृष्यते।**
**षड्भिर्मासैः श्रुतधरः सुवर्णप्राशाद्भवेत्॥**[10]

अर्थात् पूर्वदिशयां बालकः मुखं प्रक्षाल्य उपावेशनीयः, ततः प्रक्षालिते प्रस्तरखण्डे किञ्चित् परिमाणं जलेन सह सुवर्णमपि मिश्रीकरणीयम्। तेन सह असमानमात्रया मधु घृतञ्च मिश्रीकरणीयम्। सुवर्णस्य मधोः घृतस्य च मिश्रलेहनद्रव्यं बालकाय लेहयेत्।

एतादृशस्य लेहनपदार्थस्य बहु लाभदायकाः गुणाः भवन्ति। यथा-मेधायाः बृद्धिः भवति। अग्नेः बलस्य संवर्धने साहाय्यं करोति। आयुषः वर्धकं, कल्याणकारकम्, पुण्यकारकं शरीरस्य वर्णपरिवर्तकं तथा ग्रहवाधानिवारकं च दूरीभवति एतादृशलेहनद्रव्येन। इयं प्रक्रिया सुवरणप्राशनम् इति नाम्ना प्रसिद्धा वर्तते। बालकस्य जन्मनः परं जातकर्मसंस्कारे अपि सुवर्णप्राशनस्य विधानं सन्निविष्टं वर्तते। सुवर्णप्राशनेन बालकः एकमासाभ्यन्तरे मेधायुक्तो भवति। व्यधिभिः आक्रान्तः न भवति। तथा अपि षड्मासाभ्यन्तरे बालकः श्रुतिधरो भवति। श्रुतिधरः नाम एकवारं बालकः यं विषयं श्रुणोति तं विषयं चिरं तस्य बुद्धौ तिष्ठति।

**अन्यविधलेहनपदार्थः**

सुवर्णपाशनं तु अत्यन्तं प्रसिद्धं लेहनपदार्थः अस्ति। अन्येषां पदार्थानां विवेचनमपि अस्यां संहितायां वर्तते। यथा-

**ब्राह्मी मण्डूकपर्णी च त्रिफला चित्रको वचा।**
**शतपुष्पाशतावर्यौ दन्ती नागबला त्रिवृत्॥**

**एकैकं मधुसर्पिर्भ्यां मेधाजननमभ्यसेत्।**

**कल्याणक पञ्चगव्यं मेध्यं ब्राह्मीघृतं तथा॥**[11]

ब्राह्मी, मण्डूकपर्णी, त्रिफला, चित्रकः, शतावरी,नागवला चेत्यदयः मधुना घृतेन च सह लेहनार्थमुपयोगः करणीयः। अन्यच्च कल्याणकघृतस्य पञ्चगव्यघृतस्य ब्राह्मीघृतस्य च उपयोगः क्रियते। एनेन बालानां मेधावृद्धिः भवति। अन्यलेहपदार्थाः अपि सुचिताः-

**सभङ्गा त्रिफला ब्राह्मी द्वे वले चित्रकस्तथा।**
**मधु सर्पिरिति प्राश्यं मेधार्युबलेबृद्धये।**
**कुष्ठ वटाह्कुरा गौरी पिप्पल्यस्त्रिफला वचा।**
**ससैन्धवैर्गृत पक्कं मेधाजननमुत्तमम्।**[12] इति।

**दन्तोत्पत्तिः**

दन्ताः मानवस्य आभूषणाङ्गं भवति। दन्तहीनाः न शोभन्ते इति प्रसिद्धमस्ति। दन्ताः मानवस्य आदरस्थानं भवति। अर्थात् दन्ताः समीचिनाः स्वच्छाश्च भवेयुः इति समेषां चिन्तनं भवति। काश्यपमहर्षिः स्वकीये ग्रन्थे दन्तानां विषयमाश्रित्य एकं ग्रन्थं व्यरचयत्। दन्तोत्पत्तिः तसय अध्यायस्य नाम। ग्रन्थस्य परम्परानुसारं कश्चित् शिष्यः दन्तस्य उत्पत्तिविषयकं प्रश्नं करोति। काश्यपमहर्षिः तस्य उत्तरं ददाति।

अत्र शिष्येन प्रश्नाः पृष्टाः यथा- मनुष्यस्य जन्मनः परं कतिभ्यः मासेभ्यः परं दन्ताः उद्भवन्ति? दन्तानां निषेचनं कदा दृश्यते? निषेचनात् परं कदा मूर्तरूपेण दृश्यन्ते? ततः च कदा दन्तानां प्रकाशनानन्तरं पूर्वरूपस्य स्थितिः कीदृशी भवति? दन्तोद्भेदसमये उदद्रवौ द्वौ दृष्टिगोचरौ भवतः। एतयोः उपद्रवयोः का चिकित्सा विहिता वर्तते? कस्य दन्तस्य उत्पत्तिसमये प्रशान्तता भवति कस्य च अप्रशान्तता भवति? दन्तानां स्वकीयपरिमाणस्य अपेक्षया बृहत् भवति चेत् तद्दोषाय किम्? कति दन्ताः मनुष्यानां भवति? तथा चोक्तम्-

**अथ खलु भगवन् देहिनां जातानामभिवर्धमानानां कतिषु मासेषु दन्ता निषिच्यन्ते, निषिक्ताश्च कियता कालेन मूर्तीभवन्ति, मूर्तीभूताश्च कदोद्भिद्यन्ते, कानि चैषां पूर्वरूपाणि, के चोपद्रवाः, कश्चैपामुपक्रमः, किञ्च दन्तजन्म प्रशस्तमप्रशस्तं च किं, कस्माच्च स्वङ्गमभिवर्धमानं प्रणसंशयाय भवति, कियन्तश्च दन्ताः, कतिचेषां द्विजाः, कियता च कालेन पतन्ति, पतिता वा जायन्ते, दन्तसपदसंपच्च्य कीदृशीति।**[13] **इति।**

भगवान् काश्यपः उत्तरति यत् मनुष्याणां ३२ दन्ताः भवन्ति। ३२ दन्तेषु अष्टौ दन्ताः सकृज्जाताः स्वकीयस्वरूपेण बृद्धिं प्राप्नुवन्ति। अवशिष्टाः २४ दन्ताः द्विजाः भवन्ति। यतिमासेषु दन्तानां निषेचनं भवति ततिदिनेषु दन्ताः नष्टाः भवन्ति। अर्थात् यदि कस्यापि बालकस्य दन्ता चतुर्षु मासेषु दन्ताः दृश्यमानाः भवन्ति तर्हि ततः चतुर्षु मासेषु ते दन्ताः नष्टाः भूत्वा पूनः उद्भवन्ति। नष्टदन्ताः पुनर्यदा उत्पद्यन्ते ते दन्ताः स्थायिदन्ताः इति । दन्ताः द्वयोः पङ्क्योः विभक्ताः सन्ति। उपरपङ्क्तौ विद्यमानेषु दन्तेषु मध्यविद्यमानौ द्वौ दन्तौ राजदन्तौ इति वदन्ति। तत् दन्तद्वयं पवित्रमिति। यदि कस्यापि तौ द्न्तौ नष्टौ तर्हि सः अपवित्रः। सः पवित्रकर्मसु भागग्रहणायः अयोग्यः इति व्यवहारः। राजदन्तयोः पाश्वे विद्यमानौ द्वौ दन्तौ वस्तौ इति नामाख्यौ। वस्तयोः पाश्वे विद्यमाने द्रष्टे इत्येवं रूपेण विवरणं दत्तम्। तथा चोक्तम्-

अथोवाच भगवान कश्यपः - **इह खलु नृणां द्वात्रिंशद्दन्ताः, तत्राष्टौ सकृज्जाताः स्वरूढदन्ता भवन्ति, अतः सो द्विजाः। यावत्स्वेव च मासेषु दन्ता निषिच्यन्ते तावत्स्वहः सूद्भिद्यन्ते। यावत्स्वेव च मासेषु जातस्य सत उन्द्रिय तावत्स्वेव च वर्षेषु पतिताः पुनरुद्भिद्यते। तत्र मध्ये द्वावुत्तरी राजदन्तसंज्ञौ भवतः, तौ पवित्री, तस्मात्ताभ्यां खण्डे श्रद्धमर्हति, अपवित्रों हि सः। तयोरुभतः पार्श्वयोरपि वस्तौ तयोरपि दंष्ट्र, शेषाः स्वरूढा हानव्या इति चोच्यते तथाऽधस्तात्।**[14]

(का० सू० दर्तध्याय २०/४) इति।

एवमेव अध्यायेऽस्मिन् बालिकानां दन्ताः शीघ्रमुद्भवन्ति, उद्भवनसमये कष्टमपि अल्पमेव भवति। बालकानां दन्तानामुद्भावनसमये महत् कष्टं भवति। दन्तानां निषेचनं, पतनम्, पुनर्मूर्तरूपधारणम्, दन्तानां दृढता इत्यादि विषयाः मातापित्रोः अनुकरणशीलाः भवन्ति। केषाञ्चन् प्राक्तनानाम् ऋषिणां मतं वर्तते प्राक्तनकर्मणः अनुसारं जायन्ते विपरिणमन्ते च इत्यादयः बहवः दन्तोत्पत्तिविषयकाः सिद्धान्ताः चर्चिताः सन्ति।

सम्पूर्णकाश्यपसंहितायाः अध्ययनेन इदमवगम्यते आयुर्वेदसिद्धान्ताः तु अन्यासु संहितासु यद्यपि निहिताः सन्ति तथापि विशेषतः अस्यां कौमारभृत्यचर्चाः चर्चिताः। अर्थात् सुश्रुतसंहिता चिकित्सासिद्धान्ताः प्रतिपादिताः, तथा चरकसंहितायां शल्यचिकित्सासिद्धान्ताः उपवर्णिताः काश्यपसंहितायां बालानां विकासाय चर्चाः उपनिबद्धाः सन्ति। अस्मिन् शोधपत्रे तु केवलं लेहाध्यायः, दन्तोत्पत्त्यध्यायः च वर्णितौ। एताभ्यमन्तरा बालकानां कृते दत्तस्य औषधस्य मात्रा कियती भवेत् तस्यापि चर्चा अपि विद्यते। बालानां पुष्टिविज्ञानदिशा स्तन्यप्रकरणमपि निबद्धमस्ति। अन्यच्च नेत्रव्याधिप्रकरणमपि वर्तते अत्र।

**सन्दर्भग्रन्थसूची**

१.काश्यपसंहिता, पण्डितहेमराजशर्मा, चौखाम्बा संस्कृत संस्थानम्, वाराणसी, १९७६
२.कौमारभृत्यमञ्जुषा, डा.हरीश कुमार सिंघल, चौखाम्भा पाब्लिकेशन्स, नवदेहली, २०१९
३.आयुर्वेद का सुबोध इतिहास, डा.कन्हैया लाल तिवारी, ईष्ट्न बुक लिंकर्स, देहल्ली, २०००

**सन्दर्भः**

1 काश्यपसंहिता- पुटम्-61
2 काश्यपसंहिता- पुटम्-65, सुश्रुतसंहिता-सूत्रम्-1
3 काश्यपसंहिता-61
4 काश्यपसंहिता-62
5 सुश्रुतसंहिता-1.5
6 काश्यपसंहिता- लेहाध्यायः- पुटम्-1
7 काश्यपसंहिता- लेहाध्यायः- पुटम्-3-4
8 काश्यपसंहिता- लेहाध्यायः- पुटम्-४
9 काश्यपसंहिता- लेहाध्यायः- पुटम्- ४
10 काश्यपसंहिता- लेहाध्यायः- पुटम्-५
11 काश्यपसंहिता- लेहाध्यायः- पुटम्-५
12 काश्यपसंहिता- लेहाध्यायः-पुटम्-५
13 काश्यपसंहिता- दन्तजन्मिकाध्यायः- पुटम्-२०
14 काश्यपसंहिता- दन्तजन्मिकाध्यायाः- पुटम्- २०